# Dhyanani Meditations of various deities and teachers

# દેવદેવતાસદ્ગુરુધ્યાનાનિ

## Document Information

Text title : Dhyanani Meditations of various deities and teachers

File name : dhyAnAni.itx

Category : misc, shrIdharasvAmI, stotra

Location : doc_z_misc_general

Author : Shridharasvami

Description/comments : shrIdharasvAmI stotraratnAkara

Acknowledge-Permission: Upendra Shripad Dasare, https://shridharamrut.com

Latest update : November 8, 2022

Send corrections to : Sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

November 13, 2022

*sanskritdocuments.org*

# દેવદેવતાસદ્ગુરુધ્યાનાનિ

ગુરુપરમ્પરા-

આદિનારાયણં વિષ્ણું બ્રહ્માહં ચ વસિષ્ઠકમ્ ।
શ્રીરામં મારુતિં વન્દે રામદાસં ચ શ્રીધરમ્ ॥ ૧॥

શ્રીશ્રીધર-

નમઃ શાન્તાય દિવ્યાય સત્યધર્મસ્વરૂપિણે ।
સ્વાનન્દામૃતતૃપ્તાય શ્રીધરાય નમો નમઃ ॥ ૨॥

શ્રીગણેશ-

યં નત્વા મુનયઃ સર્વે નિર્વિઘ્નં યાન્તિ તત્પદમ્ ।
ગણેશોપનિષદ્વેદ્યં તદ્બ્રહ્મૈવાસ્મિ સર્વગમ્ ॥ ૩॥

શ્રીસરસ્વતી-

સચ્ચિદાનન્દરૂપિણ્યૈ ભક્તકારુણ્યસિન્ધવે ।
ભવસાગરતારિણ્યૈ સરસ્વત્યૈ નમો નમઃ ॥ ૪॥

શ્રીશિવ-

નમઃ શિવાય ગુરવે સચ્ચિદાનન્દમૂર્તયે ।
નિષ્પ્રપઞ્ચાય શાન્તાય નિરાલમ્બાય તેજસે ॥ ૫॥

શ્રીભવાની-

ચિદાનન્દમયીં દિવ્યાં આદિમધ્યાન્તવર્જિતામ્ ।
આત્મરૂપાં પરાં શાન્તાં ભવાનીં નૌમિ સન્તતમ્ ॥ ૬॥

શ્રીસૂર્ય-

સૂર્યાદ્ભવન્તિ ભૂતાનિ સૂર્યેણ પાલિતાનિ તુ ।
સૂર્યે લયં પ્રાપ્નુવન્તિ યઃ સૂર્યઃ સોઽહમેવ ચ ॥ ૭॥

શ્રીદત્તાત્રેય-

દત્તાત્રેયં શિવં શાન્તં સચ્ચિદાનન્દમદ્વયમ્ ।

આત્મરૂપ પરં દિવ્યમવધૂતમુપાસ્મહે ॥ ૮॥

શ્રીનૃસિંહ-

સચ્ચિત્સુખસ્વરૂપાય જગત્કલ્યાણહેતવે ।
આત્મરૂપાય શાન્તાય શ્રીનૃસિંહાય તે નમઃ ॥ ૯॥

શ્રીવ્યકટેશ-

કલ્યાણાદ્ભુતગાત્રાય મોક્ષાનન્દપ્રદાયિને ।
શ્રીમદ્વ્યઙ્કટનાથાય શ્રીનિવાસાય તે નમઃ ॥ ૧૦॥

શ્રીકૃષ્ણ-

સચ્ચિદાનન્દરૂપાય કૃષ્ણાય ક્લિષ્ટકર્મણે ।
નમો વેદાન્તવેદ્યાય ગુરવે બુદ્ધિસાક્ષિણે ॥ ૧૧॥

શ્રીગોવિન્દ-

સચ્ચિત્સુખનાકારં આદિમધ્યાન્તવર્જિતમ્ ।
વેદગમ્યં પરં બ્રહ્મ ગોવિન્દં પ્રણતોસ્મ્યહમ્ ॥ ૧૨॥

શ્રીઅઞ્જનેય-

જગત્કલ્યાણકાર્યાય રામભક્તપ્રદાયિને ।
ચિદાનન્દાય ગુરવે આઞ્જનેયાય તે નમઃ ॥ ૧૩॥

શ્રીસમર્થરામદાસ-

અનન્તબલવીર્યાય મોક્ષાનન્દપ્રદાયિને ।
સચ્ચિત્સુખસ્વરૂપાય રામદાસાય તે નમઃ ॥ ૧૪॥

શ્રીમલ્હારીમાર્તણ્ડ-

દત્તમલ્હારિરૂપેણ રાજતે યો દિવાનિશમ્ ।
સચ્ચિદાનન્દમદ્વન્દ્વં શ્રીધરં તં નતોસ્મ્યહમ્ ॥ ૧૫॥

શ્રીગુરુ-

આનન્દઘનરૂપાય નિત્યમઙ્ગલરૂપિણે ।
મમાખણ્ડસ્વરૂપાય નિત્યં શ્રીગુરવે નમઃ ॥ ૧૬॥

શ્રીરામચન્દ્ર-

વિશ્વોદ્ભવસ્થિતિલયાદિષુ હેતુમેકં
માયાશ્રયં વિગતમાયમચિન્ત્યમૂર્તિમ્ ।
આનન્દસાન્દ્રમમલં નિજબોધરૂપં

સીતાપતિં વિદિતતત્ત્વમહં નમામિ । ૧૭॥

॥ શ્રીસદ્ગુરુચરણારવિન્દાભ્યાં નમઃ ધ્યાયામિ ॥

*Dhyanani Meditations of various deities and teachers*

pdf was typeset on November 13, 2022

Please send corrections to *sanskrit@cheerful.com*